# RiShabhagItA

# ઋષભગીતા

## Document Information

Text title : RiShabhagItA

File name : Rishhabhagiitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Proofread by : Sunder Hattangadi, PSA Easwaran

Description-comments : Mahabharat Shantiparva Chapter 124-128 (Adhaya numbers differ for different editions)

Acknowledge-Permission: Professor Tokunaga

Latest update : December 29, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 29, 2022

*sanskritdocuments.org*

# ઋષભગીતા

મહાભારતે શાન્તિપર્વાન્તર્ગતા ।

## અધ્યાયઃ ૧૨૪

 યુધિષ્ઠિર ઉવાચ ।
ઇમે જના નરશ્રેષ્ઠ પ્રશંસન્તિ સદા ભુવિ ।
ધર્મસ્ય શીલમેવાદૌ તતો મે સંશયો મહાન્ ॥ ૧॥

યદિ તચ્છક્યમસ્માભિર્જ્ઞાતું ધર્મભૃતાં વર ।
શ્રોતુમિચ્છામિ તત્સર્વં યથૈતદુપલભ્યતે ॥ ૨॥

કથં નુ પ્રાપ્યતે શીલં શ્રોતુમિચ્છામિ ભારત ।
કિં લક્ષણં ચ તત્પ્રોક્તં બ્રૂહિ મે વદતાં વર ॥ ૩॥

 ભીષ્મ ઉવાચ ।
પુરા દુર્યોધનેનેહ ધૃતરાષ્ટ્રાય માનદ ।
આખ્યાતં તપ્યમાનેન શ્રિયં દૃષ્ટ્વા તથાગતામ્ ॥ ૪॥

ઇન્દ્રપ્રસ્થે મહારાજ તવ સ ભ્રાતૃકસ્ય હ ।
સભાયાં ચાવહસનં તત્સર્વં શ‍ૃણુ ભારત ॥ ૫॥

ભવતસ્તાં સભાં દૃષ્ટ્વા સમૃદ્ધિં ચાપ્યનુત્તમામ્ ।
દુર્યોધનસ્તદાસીનઃ સર્વં પિત્રે ન્યવેદયત્ ॥ ૬॥

શ્રુત્વા ચ ધૃતરાષ્ટ્રોઽપિ દુર્યોધનવચસ્તદા ।
અબ્રવીત્કર્ણસહિતં દુર્યોધનમિદં વચઃ ॥ ૭॥

કિમર્થં તપ્યસે પુત્ર શ્રોતુમિચ્છામિ તત્ત્વતઃ ।
શ્રુત્વા ત્વામનુનેષ્યામિ યદિ સમ્યગ્ભવિષ્યસિ ॥ ૮॥

યથા ત્વં મહદૈશ્વર્યં પ્રાપ્તઃ પરપુરઞ્જય ।

કિઙ્કુરા ભ્રાતરઃ સર્વે મિત્રાઃ સમ્બન્ધિનસ્તથા ॥ ૯॥

આચ્છાદયસિ પ્રાવારાનશ્નાસિ પિશિતૌદનમ્ ।
આજાનેયા વહન્તિ ત્વાં કસ્માચ્છોચસિ પુત્રક ॥ ૧૦॥

દુર્યોધન ઉવાચ ।
દશ તાનિ સહસ્રાણિ સ્નાતકાનાં મહાત્મનામ્ ।
ભુઞ્જતે રુક્મપાત્રીષુ યુધિષ્ઠિર નિવેશને ॥ ૧૧॥

દૃષ્ટ્વા ચ તાં સભાં દિવ્યાં દિવ્યપુષ્પફલાન્વિતામ્ ।
અશ્વાંસ્તિત્તિરકલ્માષાન્રત્નાનિ વિવિધાનિ ચ ॥ ૧૨॥

દૃષ્ટ્વા તાં પાણ્ડવેયાનામૃદ્ધિમિન્દ્રોપમાં શુભામ્ ।
અમિત્રાણાં સુમહતીમનુશોચામિ માનદ ॥ ૧૩॥

ધૃતરાષ્ટ્ર ઉવાચ ।
યદીચ્છસિ શ્રિયં તાત યાદૃશીં તાં યુધિષ્ઠિરે ।
વિશિષ્ટાં વા નરવ્યાઘ્ર શીલવાન્ભવ પુત્રક ॥ ૧૪॥

શીલેન હિ ત્રયો લોકાઃ શક્યા જેતું ન સંશયઃ ।
ન હિ કિઞ્ચિદસાધ્યં વૈ લોકે શીલવતાં ભવેત્ ॥ ૧૫॥

એકરાત્રેણ માન્ધાતા ત્ર્યહેણ જનમેજયઃ ।
સપ્તરાત્રેણ નાભાગઃ પૃથિવીં પ્રતિપેદિવાન્ ॥ ૧૬॥

એતે હિ પાર્થિવાઃ સર્વે શીલવન્તો દમાન્વિતાઃ ।
અતસ્તેષાં ગુણક્રીતા વસુધા સ્વયમાગમત્ ॥ ૧૭॥

અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
નારદેન પુરા પ્રોક્તં શીલમાશ્રિત્ય ભારત ॥ ૧૮॥

પ્રહ્લાદેન હૃતં રાજ્યં મહેન્દ્રસ્ય મહાત્મનઃ ।
શીલમાશ્રિત્ય દૈત્યેન ત્રૈલોક્યં ચ વશીકૃતમ્ ॥ ૧૯॥

તતો બૃહસ્પતિં શક્રઃ પ્રાઞ્જલિઃ સમુપસ્થિતઃ ।
ઉવાચ ચ મહાપ્રાજ્ઞઃ શ્રેય ઇચ્છામિ વેદિતુમ્ ॥ ૨૦॥

તતો બૃહસ્પતિસ્તસ્મૈ જ્ઞાનં નૈઃશ્રેયસં પરમ્ ।
કથયામાસ ભગવાન્દેવેન્દ્રાય કુરૂદ્વહ ॥ ૨૧॥

એતાવચ્છ્રેય ઇત્યેવ બૃહસ્પતિરભાષત ।

ઇન્દ્રસ્તુ ભૂયઃ પપ્રચ્છ ક્વ વિશેષો ભવેદિતિ ॥ ૨૨॥

બૃહસ્પતિરુવાચ ।
વિશેષોઽસ્તિ મહાંસ્તાત ભાર્ગવસ્ય મહાત્મનઃ ।
તત્રાગમય ભદ્રં તે ભૂય એવ પુરન્દર ॥ ૨૩॥

ધૃતરાષ્ટ્ર ઉવાચ ।
આત્મનસ્તુ તતઃ શ્રેયો ભાર્ગવાત્સુમહાયશાઃ ।
જ્ઞાનમાગમયત્પ્રીત્યા પુનઃ સ પરમદ્યુતિઃ ॥ ૨૪॥

તેનાપિ સમનુજ્ઞાતો ભાર્ગવેણ મહાત્મના ।
શ્રેયોઽસ્તીતિ પુનર્ભૂયઃ શુક્રમાહ શતક્રતુઃ ॥ ૨૫॥

ભાર્ગવસ્ત્વાહ ધર્મજ્ઞઃ પ્રહ્લાદસ્ય મહાત્મનઃ ।
જ્ઞાનમસ્તિ વિશેષેણ તતો હૃષ્ટશ્ચ સોઽભવત્ ॥ ૨૬॥

સ તતો બ્રાહ્મણો ભૂત્વા પ્રહ્લાદં પાકશાસનઃ ।
સૃત્વા પ્રોવાચ મેધાવી શ્રેય ઇચ્છામિ વેદિતુમ્ ॥ ૨૭॥

પ્રહ્લાદસ્ત્વબ્રવીદ્વિપ્રં ક્ષણો નાસ્તિ દ્વિજર્ષભ ।
ત્રૈલોક્યરાજ્યે સક્તસ્ય તતો નોપદિશામિ તે ॥ ૨૮॥

બ્રાહ્મણસ્ત્વબ્રવીદ્વાક્યં કસ્મિન્કાલે ક્ષણો ભવેત્ ।
તતોપદિષ્ટમિચ્છામિ યદ્યત્કાર્યાન્તરં ભવેત્ ॥ ૨૯॥

તતઃ પ્રીતોઽભવદ્રાજા પ્રહ્લાદો બ્રહ્મવાદિને ।
તથેત્યુક્ત્વા શુભે કાલે જ્ઞાનતત્ત્વં દદૌ તદા ॥ ૩૦॥

બ્રાહ્મણોઽપિ યથાન્યાયં ગુરુવૃત્તિમનુત્તમામ્ ।
ચકાર સર્વભાવેન યદ્વત્સ મનસેચ્છતિ ॥ ૩૧॥

પૃષ્ટશ્ચ તેન બહુશઃ પ્રાપ્તં કથમરિન્દમ ।
ત્રૈલોક્યરાજ્યં ધર્મજ્ઞ કારણં તદ્બ્રવીહિ મે ॥ ૩૨॥

પ્રહ્લાદ ઉવાચ ।
નાસૂયામિ દ્વિજશ્રેષ્ઠ રાજાસ્મીતિ કદાચન ।
કવ્યાનિ વદતાં તાત સંયચ્છામિ વહામિ ચ ॥ ૩૩॥

તે વિસ્રબ્ધાઃ પ્રભાષન્તે સંયચ્છન્તિ ચ માં સદા ।
તે મા કવ્યપદે સક્તં શુશ્રૂષુમનસૂયકમ્ ॥ ૩૪॥

ધર્માત્માનં જિતક્રોધં સંયતં સંયતેન્દ્રિયમ્ ।
સમાચિન્વન્તિ શાસ્તારઃ ક્ષૌદ્રં મધ્વિવ મક્ષિકાઃ ॥ ૩૫॥

સોઽહં વાગગ્રવિધાનાં રસાનામવલેહિતા ।
સ્વજાત્યાનધિતિષ્ઠામિ નક્ષત્રાણીવ ચન્દ્રમાઃ ॥ ૩૬॥

એતત્પૃથિવ્યામમૃતમેતચ્ચક્ષુરનુત્તમમ્ ।
યદ્બ્રાહ્મણ મુખે કવ્યમેતચ્છ્રુત્વા પ્રવર્તતે ॥ ૩૭॥

ધૃતરાષ્ટ્ર ઉવાચ ।
એતાવચ્છ્રેય ઇત્યાહ પ્રહ્લાદો બ્રહ્મવાદિનમ્ ।
શુશ્રૂષિતસ્તેન તદા દૈત્યેન્દ્રો વાક્યમબ્રવીત્ ॥ ૩૮॥

યથાવદ્ગુરુવૃત્ત્યા તે પ્રીતોઽસ્મિ દ્વિજસત્તમ ।
વરં વૃણીષ્વ ભદ્રં તે પ્રદાતાસ્મિ ન સંશયઃ ॥ ૩૯॥

કૃતમિત્યેવ દૈત્યેન્દ્રમુવાચ સ ચ વૈ દ્વિજઃ ।
પ્રહ્લાદસ્ત્વબ્રવીત્પ્રીતો ગૃહ્યતાં વર ઇત્યુત ॥ ૪૦॥

બ્રાહ્મણ ઉવાચ ।
યદિ રાજન્પ્રસન્નસ્ત્વં મમ ચેચ્છસિ ચેદ્ધિતમ્ ।
ભવતઃ શીલમિચ્છામિ પ્રાપ્તુમેષ વરો મમ ॥ ૪૧॥

ધૃતરાષ્ટ્ર ઉવાચ ।
તતઃ પ્રીતશ્ચ દૈત્યેન્દ્રો ભયં ચાસ્યાભવન્મહત્ ।
વરે પ્રદિષ્ટે વિપ્રેણ નાલ્પચેતાયમિત્યુત ॥ ૪૨॥

એવમસ્ત્વિતિ તં પ્રાહ પ્રહ્લાદો વિસ્મિતસ્તદા ।
ઉપાકૃત્ય તુ વિપ્રાય વરં દુઃખાન્વિતોઽભવત્ ॥ ૪૩॥

દત્તે વરે ગતે વિપ્રે ચિન્તાસીન્મહતી તતઃ ।
પ્રહ્લાદસ્ય મહારાજ નિશ્ચયં ન ચ જગ્મિવાન્ ॥ ૪૪॥

તસ્ય ચિન્તયતસ્તાત છાયા ભૂતં મહાદ્યુતે ।
તેજો વિગ્રહવત્તાત શરીરમજહાત્તદા ॥ ૪૫॥

તમપૃચ્છન્મહાકાયં પ્રહ્લાદઃ કો ભવાનિતિ ।
પ્રત્યાહ નનુ શીલોઽસ્મિ ત્યક્તો ગચ્છામ્યહં ત્વયા ॥ ૪૬॥

તસ્મિન્દ્વિજવરે રાજન્વત્સ્યામ્યહમનિન્દિતમ્ ।

યોऽસૌ શિષ્યત્વમાગમ્ય ત્વયિ નિત્યં સમાહિતઃ ।
ઇત્યુક્ત્વાન્તર્હિતં તદ્વૈ શક્રં ચાન્વવિશત્પ્રભો ॥ ૪૭॥

તસ્મિંસ્તેજસિ યાતે તુ તાદૃગ્રૂપસ્તતોऽપરઃ ।
શરીરાન્નિઃસૃતસ્તસ્ય કો ભવાનિતિ ચાબ્રવીત્ ॥ ૪૮॥

ધર્મં પ્રહ્લાદ માં વિદ્ધિ યત્રાસૌ દ્વિજસત્તમઃ ।
તત્ર યાસ્યામિ દૈત્યેન્દ્ર યતઃ શીલં તતો હ્યહમ્ ॥ ૪૯॥

તતોऽપરો મહારાજ પ્રજ્વલન્નિવ તેજસા ।
શરીરાન્નિઃસૃતસ્તસ્ય પ્રહ્લાદસ્ય મહાત્મનઃ ॥ ૫૦॥

કો ભવાનિતિ પૃષ્ટશ્ચ તમાહ સ મહાદ્યુતિઃ ।
સત્યમસ્મ્યસુરેન્દ્રાગ્ર્ય યાસ્યેऽહં ધર્મમન્વિહ ॥ ૫૧॥

તસ્મિન્નનુગતે ધર્મં પુરુષે પુરુષોऽપરઃ ।
નિશ્ચક્રામ તતસ્તસ્માત્પૃષ્ટશ્ચાહ મહાત્મના ।
વૃત્તં પ્રહ્લાદ માં વિદ્ધિ યતઃ સત્યં તતો હ્યહમ્ ॥ ૫૨॥

તસ્મિન્ગતે મહાશ્વેતઃ શરીરાત્તસ્ય નિર્યયૌ ।
પૃષ્ટશ્ચાહ બલં વિદ્ધિ યતો વૃત્તમહં તતઃ ।
ઇત્યુક્ત્વા ચ યયૌ તત્ર યતો વૃત્તં નરાધિપ ॥ ૫૩॥

તતઃ પ્રભામયી દેવી શરીરાત્તસ્ય નિર્યયૌ ।
તામપૃચ્છત્સ દૈત્યેન્દ્રઃ સા શ્રીરિત્યેવમબ્રવીત્ ॥ ૫૪॥

ઉષિતાસ્મિ સુખં વીર ત્વયિ સત્યપરાક્રમે ।
ત્વયા ત્યક્તા ગમિષ્યામિ બલં યત્ર તતો હ્યહમ્ ॥ ૫૫॥

તતો ભયં પ્રાદુરાસીત્પ્રહ્લાદસ્ય મહાત્મનઃ ।
અપૃચ્છત ચ તાં ભૂયઃ ક્વ યાસિ કમલાલયે ॥ ૫૬॥

ત્વં હિ સત્યવ્રતા દેવી લોકસ્ય પરમેશ્વરી ।
કશ્ચાસૌ બ્રાહ્મણશ્રેષ્ઠસ્તત્ત્વમિચ્છામિ વેદિતુમ્ ॥ ૫૭॥

શ્રીરુવાચ ।
સ શક્રો બ્રહ્મચારી ચ યસ્ત્વયા ચોપશિક્ષિતઃ ।
ત્રૈલોક્યે તે યદૈશ્વર્યં તત્તેનાપહૃતં પ્રભો ॥ ૫૮॥

શીલેન હિ ત્વયા લોકાઃ સર્વે ધર્મજ્ઞ નિર્જિતાઃ ।

તદ્વિજ્ઞાય મહેન્દ્રેણ તવ શીલં હૃતં પ્રભો ॥ ૫૯॥

ધર્મઃ સત્યં તથા વૃત્તં બલં ચૈવ તથા હ્યહમ્ ।
શીલમૂલા મહાપ્રાજ્ઞ સદા નાસ્ત્યત્ર સંશયઃ ॥ ૬૦॥

ભીષ્મ ઉવાચ ।
એવમુક્ત્વા ગતા તુ શ્રીસ્તે ચ સર્વે યુધિષ્ઠિર ।
દુર્યોધનસ્તુ પિતરં ભૂય એવાબ્રવીદિદમ્ ॥ ૬૧॥

શીલસ્ય તત્ત્વમિચ્છામિ વેત્તું કૌરવનન્દન ।
પ્રાપ્યતે ચ યથા શીલં તમુપાયં વદસ્વ મે ॥ ૬૨॥

ધૃતરાષ્ટ્ર ઉવાચ ।
સોપાયં પૂર્વમુદ્દિષ્ટં પ્રહ્લાદેન મહાત્મના ।
સઙ્ક્ષેપતસ્તુ શીલસ્ય શ઼ૃણુ પ્રાપ્તિં નરાધિપ ॥ ૬૩॥

અદ્રોહઃ સર્વભૂતેષુ કર્મણા મનસા ગિરા ।
અનુગ્રહશ્ચ દાનં ચ શીલમેતત્પ્રશસ્યતે ॥ ૬૪॥

યદન્યેષાં હિતં ન સ્યાદાત્મનઃ કર્મ પૌરુષમ્ ।
અપત્રપેત વા યેન ન તત્કુર્યાત્કથઞ્ચન ॥ ૬૫॥

તત્તુ કર્મ તથા કુર્યાદ્યેન શ્લાઘેત સંસદિ ।
એતચ્છીલં સમાસેન કથિતં કુરુસત્તમ ॥ ૬૬॥

યદ્યપ્યશીલા નૃપતે પ્રાપ્નુવન્તિ ક્વચિચ્છ્રિયમ્ ।
ન ભુઞ્જતે ચિરં તાત સમૂલાશ્ચ પતન્તિ તે ॥ ૬૭॥

એતદ્વિદિત્વા તત્ત્વેન શીલવાન્ભવ પુત્રક ।
યદીચ્છસિ શ્રિયં તાત સુવિશિષ્ટાં યુધિષ્ઠિરાત્ ॥ ૬૮॥

ભીષ્મ ઉવાચ ।
એતત્કથિતવાન્પુત્રે ધૃતરાષ્ટ્રો નરાધિપ ।
એતત્કુરુષ્વ કૌન્તેય તતઃ પ્રાપ્સ્યસિ તત્ફલમ્ ॥ ૬૯॥

ઇતિ શ્રીમહાભરતે શાન્તિપર્વણિ રાજધર્માનુશાસનપર્વણિ
શીલવર્ણનં નામ ચતુર્વિંશત્યધિકશતતમોઽધ્યાયઃ । ૧૨૪

## અધ્યાયઃ ૧૨૫

યુધિષ્ઠિર ઉવાચ ।
શીલં પ્રધાનં પુરુષે કથિતં તે પિતામહ ।
કથમાશા સમુત્પન્ના યા ચ સા તદ્વદસ્વ મે ॥ ૧॥

સંશયો મે મહાનેષ સમુત્પન્નઃ પિતામહ ।
છેત્તા ચ તસ્ય નાન્યોऽસ્તિ ત્વત્તઃ પરપુરઞ્જય ॥ ૨॥

પિતામહાશા મહતી મમાસીદ્ધિ સુયોધને ।
પ્રાપ્તે યુદ્ધે તુ યદ્યુક્તં તત્કર્તાયમિતિ પ્રભો ॥ ૩॥

સર્વસ્યાશા સુમહતી પુરુષસ્યોપજાયતે ।
તસ્યાં વિહન્યમાનાયાં દુઃખો મૃત્યુરસંશયમ્ ॥ ૪॥

સોऽહં હતાશો દુર્બુદ્ધિઃ કૃતસ્તેન દુરાત્મના ।
ધાર્તરાષ્ટ્રેણ રાજેન્દ્ર પશ્ય મન્દાત્મતાં મમ ॥ ૫॥

આશાં મહત્તરાં મન્યે પર્વતાદપિ સદ્રુમાત્ ।
આકાશાદપિ વા રાજન્નપ્રમેયૈવ વા પુનઃ ॥ ૬॥

એષા ચૈવ કુરુશ્રેષ્ઠ દુર્વિચિન્ત્યા સુદુર્લભા ।
દુર્લભત્વાચ્ચ પશ્યામિ કિમન્યદ્દુર્લભં તતઃ ॥ ૭॥

ભીષ્મ ઉવાચ ।
અત્ર તે વર્તયિષ્યામિ યુધિષ્ઠિર નિબોધ તત્ ।
ઇતિહાસં સુમિત્રસ્ય નિર્વૃત્તમૃષભસ્ય ચ ॥ ૮॥

સુમિત્રો નામ રાજર્ષિર્હૈહયો મૃગયાં ગતઃ ।
સસાર સ મૃગં વિદ્ધ્વા બાણેન નતપર્વણા ॥ ૯॥

સ મૃગો બાણમાદાય યયાવમિતવિક્રમઃ ।
સ ચ રાજા બલી તૂર્ણં સસાર મૃગમન્તિકાત્ ॥ ૧૦॥

તતો નિમ્નં સ્થલં ચૈવ સ મૃગોऽદ્રવદાશુગઃ ।
મુહૂર્તમેવ રાજેન્દ્ર સમેન સ પથાગમત્ ॥ ૧૧॥

તતઃ સ રાજા તારુણ્યાદૌરસેન બલેન ચ ।
સસાર બાણાસનભૃત્સખડ્ગો હંસવત્તદા ॥ ૧૨॥

તીર્ત્વા નદાન્નદીંશ્ચૈવ પલ્વલાનિ વનાનિ ચ ।

અતિક્રમ્યાભ્યતિક્રમ્ય સસારૈવ વનેચરન્ ॥ ૧૩॥

સ તુ કામાન્મૃગો રાજન્નાસાદ્યાસાદ્ય તં નૃપમ્ ।
પુનરભ્યેતિ જવનો જવેન મહતા તતઃ ॥ ૧૪॥

સ તસ્ય બાણૈર્બહુભિઃ સમભ્યસ્તો વનેચરઃ ।
પ્રક્રીડન્નિવ રાજેન્દ્ર પુનરભ્યેતિ ચાન્તિકમ્ ॥ ૧૫॥

પુનશ્ચ જવમાસ્થાય જવનો મૃગયૂથપઃ ।
અતીત્યાતીત્ય રાજેન્દ્ર પુનરભ્યેતિ ચાન્તિકમ્ ॥ ૧૬॥

તસ્ય મર્મચ્છિદં ઘોરં સુમિત્રોઽમિત્રકર્શનઃ ।
સમાદાય શરશ્રેષ્ઠં કાર્મુકાન્નિરવાસૃજત્ ॥ ૧૭॥

તતો ગવ્યૂતિમાત્રેણ મૃગયૂથપયૂથપઃ ।
તસ્ય બાણપથં ત્યક્ત્વા તસ્થિવાન્પ્રહસન્નિવ ॥ ૧૮॥

તસ્મિન્નિપતિતે બાણે ભૂમૌ પ્રજલિતે તતઃ ।
પ્રવિવેશ મહારણ્યં મૃગો રાજાપ્યથાદ્રવત્ ॥ ૧૯॥

ઇતિ શ્રીમહાભરતે શાન્તિપર્વણિ રાજધર્માનુશાસનપર્વણિ
ઋષભગીતાસુ પઞ્ચવિંશત્યધિકશતતમોઽધ્યાયઃ । ૧૨૫

## અધ્યાયઃ ૧૨૬

ભીષ્મ ઉવાચ ।
પ્રવિશ્ય તુ મહારણ્યં તાપસાનામથાશ્રમમ્ ।
આસસાદ તતો રાજા શ્રાન્તશ્ચોપાવિશત્પુનઃ ॥ ૨૦॥

તં કાર્મુકધરં દૃષ્ટ્વા શ્રમાર્તં ક્ષુધિતં તદા ।
સમેત્ય ઋષયસ્તસ્મિન્પૂજાં ચક્રુર્યથાવિધિ ॥ ૨૧॥

ઋષયો રાજશાર્દૂલમપૃચ્છન્સ્વં પ્રયોજનમ્ ।
કેન ભદ્ર મુખાર્થેન સમ્પ્રાપ્તોઽસિ તપોવનમ્ ॥ ૨૨॥

પદાતિર્બદ્ધનિસ્ત્રિંશો ધન્વી બાણી નરેશ્વર ।
એતદિચ્છામ વિજ્ઞાતું કુતઃ પ્રાપ્તોઽસિ માનદ ।
કસ્મિન્કુલે હિ જાતસ્ત્વં કિન્નામાસિ બ્રવીહિ નઃ ॥ ૨૩॥

તતઃ સ રાજા સર્વેભ્યો દ્વિજેભ્યઃ પુરુષર્ષભ ।

આચખ્યૌ તદ્યથાન્યાયં પરિચર્યાં ચ ભારત ॥ ૨૪॥

હૈહયાનાં કુલે જાતઃ સુમિત્રો મિત્રનન્દનઃ ।
ચરામિ મૃગયૂથાનિ નિઘ્નન્બાણૈઃ સહસ્રશઃ ।
બલેન મહતા ગુપ્તઃ સામાત્યઃ સાવરોધનઃ ॥ ૨૫॥

મૃગસ્તુ વિદ્ધો બાણેન મયા સરતિ શલ્યવાન્ ।
તં દ્રવન્તમનુ પ્રાપ્તો વનમેતદ્યદૃચ્છયા ।
ભવત્સકાશે નષ્ટશ્રીર્હતાશઃ શ્રમકર્શિતઃ ॥ ૨૬॥

કિન્નુ દુઃખમતોઽન્યદ્વૈ યદહં શ્રમકર્શિતઃ ।
ભવતામાશ્રમં પ્રાપ્તો હતાશો નષ્ટલક્ષણઃ ॥ ૨૭॥

ન રાજ્યલક્ષણત્યાગો ન પુરસ્ય તપોધનાઃ ।
દુઃખં કરોતિ તત્તીવ્રં યથાશા વિહતા મમ ॥ ૨૮॥

હિમવાન્વા મહાશૈલઃ સમુદ્રો વા મહોદધિઃ ।
મહત્ત્વાન્નાન્વપદ્યેતાં રોદસ્યોરન્તરં યથા ।
આશાયાસ્તપસિ શ્રેષ્ઠાસ્તથા નાન્તમહં ગતઃ ॥ ૨૯॥

ભવતાં વિદિતં સર્વં સર્વજ્ઞા હિ તપોધનાઃ ।
ભવન્તઃ સુમહાભાગાસ્તસ્માત્પ્રક્ષ્યામિ સંશયમ્ ॥ ૩૦॥

આશાવાન્પુરુષો યઃ સ્યાદન્તરિક્ષમથાપિ વા ।
કિં નુ જ્યાયસ્તરં લોકે મહત્ત્વાત્પ્રતિભાતિ વઃ ।
એતદિચ્છામિ તત્ત્વેન શ્રોતું કિમિહ દુર્લભમ્ ॥ ૩૧॥

યદિ ગુહ્યં તપોનિત્યા ન વો બ્રૂતેહ માચિરમ્ ।
ન હિ ગુહ્યમતઃ શ્રોતુમિચ્છામિ દ્વિજપુઙ્ગવાઃ ॥ ૩૨॥

ભવત્તપો વિઘાતો વા યેન સ્યાદ્વિરમે તતઃ ।
યદિ વાસ્તિ કથાયોગો યોઽયં પ્રશ્નો મયેરિતઃ ॥ ૩૩॥

એતત્કારણસામગ્ર્યં શ્રોતુમિચ્છામિ તત્ત્વતઃ ।
ભવન્તોઽપિ તપોનિત્યા બ્રૂયુરેતત્સમાહિતાઃ ॥ ૩૪॥

ઇતિ શ્રીમહાભરતે શાન્તિપર્વણિ રાજધર્માનુશાસનપર્વણિ
ઋષભગીતાસુ ષડ્વિંશત્યધિકશતતમોઽધ્યાયઃ । ૧૨૬

## અધ્યાયઃ ૧૨૭

ભીષ્મ ઉવાચ ।

તતસ્તેષાં સમસ્તાનામૃષીણામૃષિસત્તમઃ ।
ઋષભો નામ વિપ્રર્ષિઃ સ્મયન્નિવ તતોઽબ્રવીત્ ॥ ૧॥

પુરાહં રાજશાર્દૂલ તીર્થાન્યનુચરન્પ્રભો ।
સમાસાદિતવાન્દિવ્યં નરનારાયણાશ્રમમ્ ॥ ૨॥

યત્ર સા બદરી રમ્યા હ્રદો વૈહાયસસ્તથા ।
યત્ર ચાશ્વશિરા રાજન્વેદાન્પઠતિ શાશ્વતાન્ ॥ ૩॥

તસ્મિન્સરસિ કૃત્વાહં વિધિવત્તર્પણં પુરા ।
પિતૃણાં દેવતાનાં ચ તત આશ્રમમિયાં તદા ॥ ૪॥

રેમાતે યત્ર તૌ નિત્યં નરનારાયણાવૃષી ।
અદૂરાદાશ્રમં કશ્ચિદ્વાસાર્થમગમં તતઃ ॥ ૫॥

તતશ્ચીરાજિનધરં કૃશમુચ્ચમતીવ ચ ।
અદ્રાક્ષમૃષિમાયાન્તં તનું નામ તપોનિધિમ્ ॥ ૬॥

અન્યૈર્નરૈર્મહાબાહો વપુષાષ્ટગુણાન્વિતમ્ ।
કૃશતા ચાપિ રાજર્ષે ન દૃષ્ટા તાદૃશી ક્વચિત્ ॥ ૭॥

શરીરમપિ રાજેન્દ્ર તસ્ય કાનિષ્ઠિકા સમમ્ ।
ગ્રીવા બાહૂ તથા પાદૌ કેશાશ્ચાદ્ભુતદર્શનાઃ ॥ ૮॥

શિરઃ કાયાનુરૂપં ચ કર્ણૌ નેત્રે તથૈવ ચ ।
તસ્ય વાક્ચૈવ ચેષ્ટા ચ સામાન્યે રાજસત્તમ ॥ ૯॥

દૃષ્ટ્વાહં તં કૃશં વિપ્રં ભીતઃ પરમદુર્મનાઃ ।
પાદૌ તસ્યાભિવાદ્યાથ સ્થિતઃ પ્રાઞ્જલિરગ્રતઃ ॥ ૧૦॥

નિવેદ્ય નામગોત્રં ચ પિતરં ચ નરર્ષભ ।
પ્રદિષ્ટે ચાસને તેન શનૈરહમુપાવિશમ્ ॥ ૧૧॥

તતઃ સ કથયામાસ કથા ધર્માર્થસંહિતાઃ ।
ઋષિમધ્યે મહારાજ તત્ર ધર્મભૃતાં વરઃ ॥ ૧૨॥

તસ્મિંસ્તુ કથયત્યેવ રાજા રાજીવલોચનઃ ।
ઉપાયાજ્જવનૈરશ્વૈઃ સબલઃ સાવરોધનઃ ॥ ૧૩॥

સ્મરન્પુત્રમરણ્યે વૈ નષ્ટં પરમદુર્મનાઃ ।
ભૂરિદ્યુમ્નં પિતા ધીમાન્રઘુશ્રેષ્ઠો મહાયશાઃ ॥ ૧૪॥

ઇહ દ્રક્ષ્યામિ તં પુત્રં દ્રક્ષ્યામીહેતિ પાર્થિવઃ ।
એવમાશાકૃતો રાજંશ્ચરન્વનમિદં પુરા ॥ ૧૫॥

દુર્લભઃ સ મયા દ્રષ્ટું નૂનં પરમધાર્મિકઃ ।
એકઃ પુત્રો મહારણ્યે નષ્ટ ઇત્યસકૃત્તદા ॥ ૧૬॥

દુર્લભઃ સ મયા દ્રષ્ટુમાશા ચ મહતી મમ ।
તયા પરીતગાત્રોઽહં મુમૂર્ષુર્નાત્ર સંશયઃ ॥ ૧૭॥

એતચ્છ્રુત્વા સ ભગવાંસ્તનુર્મુનિવરોત્તમઃ ।
અવાક્શિરા ધ્યાનપરો મુહૂર્તમિવ તસ્થિવાન્ ॥ ૧૮॥

તમનુધ્યાન્તમાલક્ષ્ય રાજા પરમદુર્મનાઃ ।
ઉવાચ વાક્યં દીનાત્મા મન્દં મન્દમિવાસકૃત્ ॥ ૧૯॥

દુર્લભં કિં નુ વિપ્રર્ષે આશાયાશ્ચૈવ કિં ભવેત્ ।
બ્રવીતુ ભગવાનેતદ્યદિ ગુહ્યં ન તન્મયિ ॥ ૨૦॥

મહર્ષિર્ભગવાંસ્તેન પૂર્વમાસીદ્વિમાનિતઃ ।
બાલિશાં બુદ્ધિમાસ્થાય મન્દભાગ્યતયાઽઽત્મનઃ ॥ ૨૧॥

અર્થયન્કલશં રાજન્કાઞ્ચનં વલ્કલાનિ ચ ।
નિર્વિણ્ણઃ સ તુ વિપ્રર્ષિર્નિરાશઃ સમપદ્યત ॥ ૨૨॥

એવમુક્ત્વાભિવાદ્યાથ તમૃષિં લોકપૂજિતમ્ ।
શ્રાન્તો ન્યષીદદ્ધર્માત્મા યથા ત્વં નરસત્તમ ॥ ૨૩॥

અર્ઘ્યં તતઃ સમાનીય પાદ્યં ચૈવ મહાનૃષિઃ ।
આરણ્યકેન વિધિના રાજ્ઞે સર્વં ન્યવેદયત્ ॥ ૨૪॥

તતસ્તે મુનયઃ સર્વે પરિવાર્ય નરર્ષભમ્ ।
ઉપાવિશન્પુરસ્કૃત્ય સપ્તર્ષય ઇવ ધ્રુવમ્ ॥ ૨૫॥

અપૃચ્છંશ્ચૈવ તે તત્ર રાજાનમપરાજિતમ્ ।
પ્રયોજનમિદં સર્વમાશ્રમસ્ય પ્રવેશનમ્ ॥ ૨૬॥

ઇતિ શ્રીમહાભરતે શાન્તિપર્વણિ રાજધર્માનુશાસનપર્વણિ

ઋષભગીતાસુ સપ્તવિંશત્યધિકશતતમોઽધ્યાયઃ । ૧૨૭

## અધ્યાયઃ ૧૨૮

રાજોવાચ ।
વીરદ્યુમ્ન ઇતિ ખ્યાતો રાજાહં દિક્ષુ વિશ્રુતઃ ।
ભૂરિદ્યુમ્નં સુતં નષ્ટમન્વેષ્ટું વનમાગતઃ ॥ ૨૭॥

એકપુત્રઃ સ વિપ્રાગ્ર્ય બાલ એવ ચ સોઽનઘ ।
ન દૃશ્યતે વને ચાસ્મિંસ્તમન્વેષ્ટું ચરામ્યહમ્ ॥ ૨૮॥

ઋષભ ઉવાચ ।
એવમુક્તે તુ વચને રાજ્ઞા મુનિરધોમુખઃ ।
તૂષ્ણીમેવાભવત્તત્ર ન ચ પ્રત્યુક્તવાન્નૃપમ્ ॥ ૨૯॥

સ હિ તેન પુરા વિપ્રો રાજ્ઞા નાત્યર્થમાનિતઃ ।
આશા કૃશં ચ રાજેન્દ્ર તપો દીર્ઘં સમાસ્થિતઃ ॥ ૩૦॥

પ્રતિગ્રહમહં રાજ્ઞાં ન કરિષ્યે કથઞ્ચન ।
અન્યેષાં ચૈવ વર્ણાનામિતિ કૃત્વા ધિયં તદા ॥ ૩૧॥

આશા હિ પુરુષં બાલં લાલાપયતિ તસ્થુષી ।
તામહં વ્યપનેષ્યામિ ઇતિ કૃત્વા વ્યવસ્થિતઃ ॥ ૩૨॥

રાજોવાચ ।
આશાયાઃ કિં કૃશત્વં ચ કિં ચેહ ભુવિ દુર્લભમ્ ।
બ્રવીતુ ભગવાનેતત્ત્વં હિ ધર્માર્થદર્શિવાન્ ॥ ૩૩॥

ઋષભ ઉવાચ ।
તતઃ સંસ્મૃત્ય તત્સર્વં સ્મારયિષ્યન્નિવાબ્રવીત્ ।
રાજાનં ભગવાન્વિપ્રસ્તતઃ કૃશતનુસ્તનુઃ ॥ ૩૪॥

કૃશત્વેન સમં રાજન્નાશાયા વિદ્યતે નૃપ ।
તસ્યા વૈ દુર્લભત્વાત્તુ પ્રાર્થિતાઃ પાર્થિવા મયા ॥ ૩૫॥

રાજોવાચ ।
કૃશાકૃશે મયા બ્રહ્મન્ગૃહીતે વચનાત્તવ ।
દુર્લભત્વં ચ તસ્યૈવ વેદ વાક્યમિવ દ્વિજ ॥ ૩૬॥

સંશયસ્તુ મહાપ્રાજ્ઞ સઞ્જાતો હૃદયે મમ ।
તન્મે સત્તમ તત્ત્વેન વક્તુમર્હસિ પૃચ્છતઃ ॥ ૩૭॥

ત્વત્તઃ કૃશતરં કિં નુ બ્રવીતુ ભગવાનિદમ્ ।
યદિ ગુહ્યં ન તે વિપ્ર લોકેઽસ્મિન્કિં નુ દુર્લભમ્ ॥ ૩૮॥

કૃશતનુરુવાચ ।
દુર્લભોઽપ્યથ વા નાસ્તિ યોઽર્થી ધૃતિમિવાપ્નુયાત્ ।
સુદુર્લભતરસ્તાત યોઽર્થિનં નાવમન્યતે ॥ ૩૯॥

સંશ્રુત્ય નોપક્રિયતે પરં શક્ત્યા યથાર્હતઃ ।
સક્તા યા સર્વભૂતેષુ સાશા કૃશતરી મયા ॥ ૪૦॥

એકપુત્રઃ પિતા પુત્રે નષ્ટે વા પ્રોષિતે તથા ।
પ્રવૃત્તિં યો ન જાનાતિ સાશા કૃશતરી મયા ॥ ૪૧॥

પ્રસવે ચૈવ નારીણાં વૃદ્ધાનાં પુત્રકારિતા ।
તથા નરેન્દ્ર ધનિનામાશા કૃશતરી મયા ॥ ૪૨॥

ઋષભ ઉવાચ ।
એતચ્છ્રુત્વા તતો રાજન્સ રાજા સાવરોધનઃ ।
સંસ્પૃશ્ય પાદૌ શિરસા નિપપાત દ્વિજર્ષભે ॥ ૪૩॥

રાજોવાચ ।
પ્રસાદયે ત્વા ભગવન્પુત્રેણેચ્છામિ સઙ્ગતિમ્ ।
વૃણીષ્વ ચ વરં વિપ્ર યમિચ્છસિ યથાવિધિ ॥ ૪૪॥

ઋષભ ઉવાચ ।
અબ્રવીચ્ચ હિ તં વાક્યં રાજા રાજીવલોચનઃ ।
સત્યમેતદ્યથા વિપ્ર ત્વયોક્તં નાસ્ત્યતો મૃષા ॥ ૪૫॥

તતઃ પ્રહસ્ય ભગવાંસ્તનુર્ધર્મભૃતાં વરઃ ।
પુત્રમસ્યાનયત્ક્ષિપ્રં તપસા ચ શ્રુતેન ચ ॥ ૪૬॥

તં સમાનાય્ય પુત્રં તુ તદોપાલભ્ય પાર્થિવમ્ ।
આત્માનં દર્શયામાસ ધર્મં ધર્મભૃતાં વરઃ ॥ ૪૭॥

સન્દર્શયિત્વા ચાત્માનં દિવ્યમદ્ભુતદર્શનમ્ ।
વિપાપ્મા વિગતક્રોધશ્ચચાર વનમન્તિકાત્ ॥ ૪૮॥

એતદ્દૃષ્ટં મયા રાજંસ્તતશ્ચ વચનં શ્રુતમ્ ।
આશામપનયસ્વાશુ તતઃ કૃશતરીમિમામ્ ॥ ૪૯॥

ભીષ્મ ઉવાચ ।
સ તત્રોક્તો મહારાજ ઋષભેણ મહાત્મના ।
સુમિત્રોઽપનયત્ક્ષિપ્રમાશાં કૃશતરીં તદા ॥ ૫૦॥

એવં ત્વમપિ કૌન્તેય શ્રુત્વા વાણીમિમાં મમ ।
સ્થિરો ભવ યથા રાજન્હિમવાનચલોત્તમઃ ॥ ૫૧॥

ત્વં હિ દ્રષ્ટા ચ શ્રોતા ચ કૃચ્છ્રેષ્વર્થકૃતેષ્વિહ ।
શ્રુત્વા મમ મહારાજ ન સન્તમુમિહાર્હસિ ॥ ૫૨॥

ઇતિ શ્રીમહાભરતે શાન્તિપર્વણિ રાજધર્માનુશાસનપર્વણિ
ઋષભગીતાસુ અષ્ટવિંશત્યધિકશતતમોઽધ્યાયઃ । ૧૨૮

॥ ઇતિ ઋષભગીતા સમાપ્તા ॥

The adhyAyas are given as in Gita press edition.
Adhyaya numbers in shAntiparva of Mahabharata BORI
(Bhandarkar Oriental Research Institute BORI).
critical edition and in Kinjavadekar's edition
differ. The verse numbers and line numbers
in each differ so it was difficult to
consolidate. Refer to the links for more clarity.

Prepared and proofread by Sunder Hattangadi, PSA Easwaran

---

*RiShabhagItA*

pdf was typeset on December 29, 2022

Please send corrections to *sanskrit@cheerful.com*